International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 356-359
© 2021 IJSR
www.anantaajournal.com
Received: 25-10-2020
Accepted: 02-12-2020

**नटवरकयालः**
शोधछात्रः
कलिकाताविश्वविद्यालयस्य,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**नटवरकयालः**
शोधछात्रः
कलिकाताविश्वविद्यालयस्य,
पश्चिम बंगाल, भारत

# संस्कृतसाहित्ये प्रतिफलितो गार्हस्थ्याश्रमसंस्कारः

**नटवरकयालः**

**प्रस्तावना**

'सहितस्य भावः' इत्यर्थे सहितशब्देन सह भावार्थे विहितस्य षञ्प्रत्ययस्य योगेन साहित्यशब्दोऽयं निष्पन्नः। परस्परसापेक्षाणां तुल्यरूपाणां युगपदेक-क्रियान्वयित्वं साहित्यमिति।

आङ् इत्युपसर्गपूर्वकात् श्रम्-धातोरुत्तरं घञ्प्रत्ययेन आश्रमशब्दोऽयं निष्पद्यते। शब्दकल्पद्रुमेऽस्ति – 'आश्राम्यन्ति स्वं स्वं तपश्चरन्त्यत्रिति आश्रमः' [1]। ब्रह्मचर्यं, गार्हस्थ्यं, बाणप्रस्थं, सन्न्यासश्चेति चतुर्विधः आश्रमः [2]। गार्हस्थ्याश्रमधर्मः कथं संस्कृतसाहित्येन सम्पृक्त इत्यस्माभिः आलोचनीयः।

ब्रह्मचर्याश्रमे कृतविद्यः बालकः समावर्तनेन संस्कृतो भूत्वा सः बालकः स्वयमेव स्वगृहे विवाहसंस्कारेण गार्हस्थ्याश्रमधर्मे प्रविशति। संस्कृतसाहित्ये प्रथितयशकविः अश्वघोषः तस्य बुद्धचरितमहाकाव्ये सिद्धार्थस्य गार्हस्थ्याश्रम-मध्ये प्रवेशं दर्शयामास।

"कुलात्ततोऽस्मै स्थिरशीलयुक्ताऽसाध्वीं वपुर्ह्रीविनयोपपन्नाम्।
यशोधरां नाम यशोविशालां वामाभिधानां श्रियमाजुहाव।।" (२/२६)

महाकविकालिदासोऽपि स्वीयरघुवंशमहाकाव्यस्य तृतीयसर्गे महाराजरघोः विद्यार्जनसमापनात् परं विवाहसंस्कारमाध्यमेन गार्हस्थ्याश्रमे प्रवेशः [3] इति ससुन्दरं चित्रितवान् ।

गार्हस्थ्याश्रमस्य तदैव सार्थकता, यत्र कामादीनां यथार्थभावेन सेवया अपत्यप्राप्तिः सम्भवति। बुद्धचरितमहाकाव्ये कविः सुन्दरभावेन गार्हस्थ्यजीवनं लिखितवान् –

"काले ततश्चारुपयोधरायां यशोधरायां स्वयशोधरायाम्।
शौद्धोदने राहुसपत्नवक्त्रो जज्ञे सुतो राहुल एव नाम्ना।।" (२/४६)

गार्हस्थ्याश्रमः खलु ऐहिकजगतः तथा पारलौकिककालस्य कल्याण-कारकत्वेन धार्यते। केवलमेव गार्हस्थ्यधर्ममवलम्ब्यैव ऋणवैविध्यपरिशोधं कर्तुं मानवः कृतकार्यो भवति [4] । गार्हस्थ्याश्रमे दाम्पत्यजीवनं गुरुत्वपूर्णम्। दाम्पत्योः परं निदर्शनं दीलिपसुदक्षिणयोः जीवनम् [5]। गार्हस्थ्याश्रमे पत्नी एव सर्वस्वा [6]।

गृहस्थानां क्रियाः धार्मिकाः संस्काराः च पत्नीप्राप्त्या सर्वाङ्गीनतया परिपूर्णा भवति। कुमारसम्भवे महाकाव्ये महाकवेः कण्ठे उच्चारिता भारती "क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम्" [7]। धार्मिकक्रियासम्पादनेन पत्नी परमा सहायका सैव सफलीकर्तुं शक्नोति धार्मिकक्रियाः सर्वाः [8]। कामना न केवलं गार्हस्थ्यजीवनस्य उद्देश्यं दाम्पत्यजीवनस्य यः सम्बन्धः सहृदयवेद्यः। अत्युग्रकामनारिक्तं दाम्पत्योः हृदयद्वयस्य बन्धनमेव गार्हस्थ्यजीवनम्। शारीरिकपरित्यक्तसीतायाः कामनासीत् यत् पूर्व-जन्मनि रामचन्द्रः तस्या एव भर्ता बभूवेति [9]।

गार्हस्थ्याश्रमे विधिवन्नियमपालनादेव पुरुषार्थचतुष्टयं प्राप्यते मनुष्यैः। महाकविकालिदासस्य मतेन अयमेव धर्मः सर्वोत्तमः। भगवान् शङ्करः वशिष्टस्य सदगृहं दृष्ट्वा गृहीतम् आस्वादयितुं व्यस्तोऽभूदिति कुमारसम्भवे दृश्यते [10]।

मनुष्यत्वस्य सामग्रिकतया विकाशस्य हेतुरूपेण गार्हस्थ्याश्रमधर्मस्य माहात्म्यमुद्घोषितं संस्कृतसाहित्येन कविपरिम्पराभिः। संस्कारेणानेन सकला चित्तशुद्धिः सम्भवति मनुष्याणाम्। महाकविपरम्पराणां रचनासु वारं वारं धर्मशास्त्रीयविधानानि परिलक्षितानि भवन्ति। पत्न्याः रजोदर्शनात् परं सन्तान-लाभस्य वासनया पतिः सङ्गमे लिप्तो भवति। ततः प्राकृतिककारणादेव सन्तानो जायते। किन्तु दाम्पत्योः वासनायाः भाविसन्तानस्य योः दोष उत्पद्यते स तु 'गर्भाधानसंस्कारेणैव बुद्धचरिते दृश्यते यत्र लोकहिताय शुद्धोदनपत्नी माया गर्भं दधार' [11]। कविकालिदासस्य रघुवंशे रघुवंशवृद्धिहेतवे' सुदक्षिणायाः गर्भाधानं प्रदर्शितम् –

"अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठयूतमैशम्।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरनिविष्टं लोकपालानुभावैः।।" (२/७५)

गार्हस्थ्यविधानात् परं विधानं तु **'पुंसवनम्'**। पुत्रप्राप्तिनिमित्तम् अयं संस्कारः आचर्यते। पुन्नामकनरकात् यः त्रायते स एव पुत्रः। केवलं पुत्रेणैव पितरौ नरकतः मुच्येते अन्त्येष्टिक्रियया। अत एव पुंसवनं पुत्रसन्तानोत्पादनकारिसंस्कारः पालनीयः। कालिदासस्य रघुवंशे संस्कारस्यास्य पालनं परिलक्ष्यते [12]। शाकुन्तले अपि धनमित्रस्य पत्न्याः पुत्रप्राप्तिहेतवे पुंसवनसंस्कारः परिलक्ष्यते – "देव, इदानीमेव साकेतकस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जाया अस्य श्रूयते।"[13]

सन्तानसम्भवात् परं कृतः संस्कारः – खलु 'जातकर्म'। गर्भदोषदूरीकरणाय तथा सन्तानायुः वृद्धिहेतवेऽयं संस्कारः क्रियते। बुद्धचरिते प्रथमे सर्गेऽयं संस्कारो लक्ष्यते –

"नरपतिरपि पुत्रजन्मतुष्टो विषयगतानि विमुच्य बन्धनानि।
कुलसदृशमचीकरद् यथावत् प्रियतनयस्तनयस्य जातकर्म।।"
(१/८२)

रघुवंशस्य तृतीयसर्गे [14], चतुर्दशसर्गे [15], विक्रमोर्वशीये चतुर्थाङ्के, शाकुन्तले च सप्तमाङ्के इदं संस्कारपालनचित्रं दरीदृश्यते। शाकुन्तले मारीचः स्वयमुवाच – "विधिवदस्माभिरनुष्ठितजातकर्मा पुत्र एषः शाकुन्तलेयः" [16]।

'नामकरणसंस्कारः' खल्वन्यतमः आवश्यिकः संस्कारः। समाजे शिशोः जन्मनः परमेव नामकरणविधानमस्ति। परवर्तिनि समये प्रतिकूलतापूर्णसमाजे अनेन नाम्ना शिशुः परिचीयते। बुद्धचरिते द्वितीयसर्गे [17] रघुवंशे पुत्राणां नामकरणसंस्कारो दरीदृश्यते [18]।

'निष्क्रमणसंस्कारः' अस्यार्थः जातशिशुसन्तानस्य बहिरानयनम्। निर्दिष्ट-काले बुद्धचरिते प्रथमसर्गे शास्त्रनिर्दिष्टशुभक्षणे लुम्बिन्युद्यानतः नगरे प्रवेशस्य घटना चित्रिता [19]।

'चूडाकरणसंस्कारः' प्राचीनसमाजस्यान्यतमः प्रसिद्धः संस्कारः। अयं चौलकर्मनामापि प्रसिद्धः। अत्र शिशोश्चूडाकरणं क्रियते। ततो वर्णमालया सह शिशोः परिचितिर्भवेदिति विधानम्। रघुवंशे [20] विधानमिदं दृश्यते। उत्तरराम-चरिते लवकुशयोश्चौलादिसंस्कारस्य निर्देशो भगवता वाल्मीकिना प्रदत्तः [21]।

धर्मादिशास्त्रैः 'उपनयनसंस्कारात्' परं शिशोः विद्याशिक्षाग्रहणे विधानं प्रदत्तमासीत्। अस्य निदर्शनं बुद्धचरिते [22], रघुवंशे तृतीयसर्गे [23], उत्तररामचरिते नाटके [24] क्रमेण सर्वार्थसिद्धेः, रघोः, लवकुशयोः प्रागुक्तप्रक्रियाविधिः संदृश्यते।

बुद्धचरितमहाकाव्यस्य एकत्र विद्वद्ब्राह्मणेभ्यो गवादीनां दानमाध्यमेन कविनाश्वघोषेण – "गोदानसंस्कारः" प्रदर्शितः [25]। महाकविकालिदासेन तु विवाहात् प्राक् गोदानसंस्कारविधिः कर्तव्यः इति विनिर्दिष्टः [26]।

संस्कृतसाहित्यस्य सर्वत्र "विवाहसंस्कारस्य" निदर्शनं सुविन्यस्तमस्ति। बुद्धचरिते द्वितीयसर्गे सर्वार्थसिद्धाय शुद्धोदनः उच्चवंशजातं सुशीलां कन्यां यशोधराम् अन्वीक्ष्य तेन सह विवाहकार्यं कारितम् [27]। रघुवंशे तृतीयसर्गे प्रणयाश्लिष्टस्नेहस्य परिणामः विवाह इत्युल्लिखितः [28]। विवाहकार्ये वरवध्वोः पारस्परिकानुरागः मङ्गलाय। ततो मालतीमाधवे अस्ति – "इतरेतरानुरागो हि विवाहकर्मणि (दारकर्मणि) परार्ध्यं मङ्गलम्" [29]। पत्नी सहधर्मचारिणीत्युच्यते। अनया विना न कश्चिद् धर्मकर्मणि अधिकारोऽस्ति पुरुषाणाम्। तथा यशोधरा उवाच –

"स मामनाथां सहधर्मचारिणीमपास्य धर्मं यदि कर्तुमिच्छति।
कुतोऽस्य धर्मः सहधर्मचारिणीं विना तपो यः परिभोक्तुमिच्छति।।" (८/६१)

कुमारसम्भवे धर्माचरणे पत्न्याः आवश्यकता अस्ति [30] इति दर्शितम्। महाकविकालिदासोऽपि काव्येषु धर्मशास्त्रीयविधिविहितविवाहसंस्कारो दर्शितः। कुमारसम्भवे शिवपार्वत्योः विवाहः [31], अजेन्दुमत्योश्च [32], रघुवंशे रामसीतयोः [33], कुशकुमुद्वत्योः [34] विवाहोऽपि तत्र चित्रितः। विक्रमोर्वशीये ऊर्वशी-पुरुरवयोः विवाहः, शाकुन्तले च सखिमुखाच्छ्रूयते दुष्यन्तशकुन्तलयोः गान्धर्वविवाहवार्त्ता [35]। सुप्रसिद्धकविः श्रीहर्षः नैषधचरिते महाकाव्ये नलदमयन्त्योर्विवाहसंस्कारम् [36] उपस्थापितवान्।

सनातनधर्मधारिणामन्तिमः गुरुत्वावहः संस्कारः "अन्त्येष्टिः"। सर्वसंस्काराणां समाप्तिरेव अनेन संस्कारेणैव समाप्यते। मरणादनन्तरं शवदेहः चन्दनाक्तः स्कन्धेन नीयते दाहार्थम्। परिवारवर्गो निष्प्राणदेहम् अनुसृत्य श्मशानं चलति [37]। रघुवंशे महाकाव्ये अग्निवर्णस्य दाहकार्यं पुरोहितस्य साहाय्येन सम्पन्नम् [38]। जटायोः शवदेहदाहोऽपि रामलक्ष्मणाभ्यां साधितः [39]।

हिन्दुसंस्कारानुसारात् सन्न्यासिनां ज्ञानिनाञ्च शवदेहानां दाहो न भवति, ते समाधिस्था वर्त्तन्ते। महाराजरघोः मृत्योः परम् अजेन पिता समाहितः [40]।

अद्य समाजे प्रेमाभावः, देशं प्रति, जातीः प्रति स्वाभिमनस्याभावः परिलक्ष्यते। अस्य कारणं खलु संस्कारहीनता। सामाजिकसंस्कारः, समाजं प्रति कर्तव्यता, भ्रातृत्वबोधः, सत्यानुरागः, धर्मनिष्ठता चेत्यादीनाम् ऐकान्तिकाभावः सर्वत्र दरीदृश्यते। एषां परिपूर्णता केवलमेव संस्कारेणैव सम्भवा। विश्वभ्रातृत्व-बोधस्तथा समग्रविश्वस्य एकत्रीकरणभावनया परिचालित ऋषिः साग्रहं वारं वारं समुदघोषयत् – "वसुधैव कुटुम्बकम्" इति।

## संधर्व सूची

### अन्त्यटीका

1. शब्दकल्पद्रुमः, (पृ. – १९५)
2. "शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
   वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।" (रघुवंशम् - १/८)
3. "मुनिवनतरुच्छायां देव्या तया सह शिश्रिये।
   गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम्।।" (रघुवंशम् – ३/७०)
4. "न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः।
   ऋणाभिधानात् स्वयमेव केवलं तदा पितृणां मुमुचे स बन्धनात्।।" (रघुवंशम् - ३/२०)
5. "तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
   पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।।" (रघुवंशम् – १/३१)
6. "गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ।
   करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्।।" (रघुवंशम् – ८/६७)
7. "तद्दर्शनादभूच्छं भोर्भूयान्दारार्थमादरः।
   क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम्।।" (कुमारसम्भवम् - ६/१३)
8. रघुवंशम् - (३/७०)
9. "साऽहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये।
   भूयो यथा मे जननान्तरेऽपि त्वमेव भर्त्ता न च विप्रयोगः।।" (रघुवंशम् – १४/६६)
10. कुमारसम्भवम् - (६/११-१३)
11. "शरणं करवाणि शर्मदं ते चरणं वाणि! चराचरोपजीव्यम्।
    करुणामसृणैः कटाक्षपातैः कुरु मामम्ब! कृतार्थसार्थवाहम्।।" (रघुवंशम् – १/३)
12. "प्रियाऽनुरागस्य मनः समुन्नतेर्भुजार्जितानां च दिगन्तसम्पदाम्।
    यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः।।" (रघुवंशम् – ३/१०)
13. अभिज्ञानशकुन्तलम् – (पृ. – ४५१)
14. "स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते।
    दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ।।" (रघुवंशम् – ३/१८)
15. रघुवंशम् – (१४/७५)
16. अभिज्ञानशकुन्तलम्, (पृ. – ५४४)
17. "एवंविधा राजकुलस्य सम्पत् सर्वार्थसिद्धिश्च यतो बभूव।
    ततो नृपस्तस्य सुतस्य नाम सर्वार्थसिद्धोऽयमिति प्रचक्रे।।" (बुद्धचरितम् – २/१७)
18. "श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः।

अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवम्।।" (रघुवंशम् – ३/२१, ५/३६, ४/२९,१०/६७)
19. "बहुविधविषयास्ततो यतात्मा स्वहृदयतोषकरीः क्रिया विधाय।
गुणवति नियते शिवे मुहूर्ते मतिमकरोन्मुदितः पुरप्रवेशे।।" (बुद्धचरितम् – १/८५)
20. "स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः।
लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत्।।" (रघुवंशम् - ३/२८)
21. "भगवता वाल्मीकिना धात्रीकर्म वस्तुतः परिगृह्य पोषितौ परिरक्षितौ च।
वृत्तचौडकर्मणोश्च तयोस्त्रयीवर्जिमितरा विद्याः सावधानेन परिनिष्ठापिताः।। (उत्तररामचरितम्, पृ. – ९२)
22. "वयश्च कौमारमतीत्य सम्यक् सम्प्राप्य काले प्रतिपत्तिकर्म।
अल्पैरहोभिर्बहुवर्षगम्या जग्राह विद्याः स्वकुलानुरूपाः।।" (बुद्धचरितम् – २/२४)
23. रघुवंशम् – (३/२९)
24. "गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय तौ त्रयीविद्यामध्यापितौ।" (उ.रा.च., पृ. – ९२)
25. "अपि च शतसहस्रपूर्णसंख्याः स्थिरबलवत्तनयाः सहेमशृङ्गीः।
अनुपगतजराः पयस्विनीर्गाः स्वयमददात्सुतवृद्धये द्विजेभ्यः।।" (बुद्धचरितम् – १/८४)
26. रघुवंशम् – (३/३३)
27. बुद्धचरितम् – (२/२६)
28. रघुवंशम् – (३/२४)
29. मालतीमाधवम्,( पृ. – १२२)
30. कुमारसम्भवम् – (६/१३)
31. कुमारसम्भवम् – (७/१, पृ. – १९७)
32. रघुवंशम् – (७/२०)
33. रघुवंशम् – (११/४८)
34. रघुवंशम् – (१६/८७)
35. अभिज्ञानशकुन्तलम्, (पृ. – २३२)
36. नैषधचरितम् – (१६/१२, १३, १५, पृ. – ३४८)
37. "अथाब्रवीद्राजसुतः स सुतं नरैश्चतुर्भिर्ह्रियते कः एषः।
दीनैर्मनुष्यैरनुगम्यमानो विभूषितश्चाप्यवरुद्यते च।।" (बुद्धचरितम् – ३/५५)
38. रघुवंशम् – (१९/५४)
39. रघुवंशम् – (१२/५६)
40. "श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः।
विदधे विधिमस्य नैष्टिकं यतिभिः सार्धमनग्निमग्निचित्।।" (रघुवंशम् – ८/२५)

## अनुशीलितग्रन्थसूची


1. अश्वघोषः. *बुद्धचरितम्.* सम्पादकः स्वामी द्वारिकादासशास्त्री. चौखम्बा वाराणसी : संस्कृत सीरीज आफिस, २०१८ (द्वितीयसंस्करणम्).
2. कालिदासः. *अभिज्ञानशकुन्तलम्.* व्याख्याता डः सत्यनारायण-चक्रवर्ती. कलिकाता : संस्कृतपुस्तकभाण्डारः, २००८ (षष्ठसंस्करणम्).
3. कालिदासः. *कुमारसम्भवम्.* सम्पादकः डःसुधाकरमालवीयः. वाराणसी : चौखम्बा कृष्णदास एकाडेमी, २०१८.
4. कालिदासः. *रघुवंशम्.* सम्पादकः डःश्रीकृष्णमणित्रिपाठी. वाराणसी : चौखम्बा सुरभारती प्रकाशनम्, २०२०.
5. कालिदासः. *रघुवंशम्.* व्याख्याता हरगोविन्दशास्त्री. वाराणसी : चौखम्बा संस्कृत संस्थान, १९८५.
6. भवभूतिः. *उत्तररामचरितम्.* सम्पादकः श्यामापदभट्टाचार्यः. कलिकाता : संस्कृत वुक् डिपो, २००७ (प्रथमसंस्करणम्).
7. भवभूतिः. *मालतीमाधवम्.* सम्पादकः श्रीयुक्तहरिदाससिद्धान्त-वागीशभट्टाचार्यः. कलिकाता : १८५८ (तृतीयसंस्करणम्).
8. राजाराधाकान्तदेवः. *शब्दकल्पद्रुमः* (द्वितीयो भागः). वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, १९६७ (तृतीयसंस्करणम्).
9. श्रीहर्षः. *नैषधचरितम्.* सम्पादकः डःश्यामलेशकुमारतिवारी. वाराणसी : चौखम्बा सुरभारती प्रकाशनम्, २०१७ (प्रथमसंस्करणम्).